ISSN : 2319-8974

# प्राची

# PRĀCĪ

A PEER-REVIEWED MULTI-LINGUAL RESEARCH JOURNAL
OF THE DEPARTMENT OF SANSKRIT
VOLUME - VIII

PRAGJYOTISH COLLEGE
SANTIPUR, GUWAHATI-781009
2024

# संस्कृतालंकारशास्त्रेषु दशरूपकग्रन्थस्य विशेषत्वम्

**Dr. Ratul Bujar Baruah**

संस्कृतालंकारिकेषु धनञ्जयस्य नाम सुविदितमस्ति। तस्य 'दशरूपकम्' इत्यभिधेयम् अलंकारशास्त्रं महत्वपूर्णं स्थानमधिकरोति। अलंकारशास्त्रेऽस्मिन् रूपकसम्बन्धिनां विविधविषयाणां संक्षिप्ताभासमुपस्थापयितुं धनञ्जयः यत्नमकरोत्। पुराकालादेव अनेके आलंकारिकाः काव्यस्य लक्षणप्रयोजनस्वरूपादिविषये पूर्वालंकारिकाणां मतानि विविच्य स्वकीयमतानि उपस्थापयन्तश्च प्रख्यातिं लब्धवन्तः। अस्मिन् प्रसङ्गे भरतादारभ्य आनन्दवर्धन-अभिनवगुप्त-मम्मट-धनञ्जय-विश्वनाथ-जगन्नाथादीनामालंकारिकाणाम् अवदानं दृश्यते। दशरूपककारेण धनञ्जयेन स्वविषये दशरूपके उल्लिखितम्-

**विष्णोः सुतेनापि धनञ्जयेन विद्वन्मनोरागनिबन्धहेतुः।**
**आविष्कृतं मुञ्जमहीशगोष्ठीवैदग्ध्यभाजा दशरूपमेतत्॥**[१]

ग्रन्थस्य चतुर्थप्रकाशात् ज्ञातुं शक्यते यत् धनञ्जयस्य पितुर्नाम विष्णुरासीत्। ग्रन्थस्य प्रारम्भे धनञ्जयः सर्वशास्त्रनिष्णातं पितरं नमस्करोति - **'नमः सर्वविदे तस्मै विष्णवे भरताय च'**[२]। धनञ्जयः परमारवंशोद्भवस्य मालवदेशस्य राज्ञः मुञ्जस्य सभाकविरासीत्।

भारतीयनाट्यपरम्परायाः प्रथमग्रन्थो भवति भरतस्य नाट्यशास्त्रम्। धनञ्जयस्य दशरूपकग्रन्थो भरतमुनेः नाट्यशास्त्राधारितः। दशरूपकस्य प्रत्येकस्य अध्यायस्य नामकरणं 'प्रकाश' इति पदेन क्रियते। अस्मिन् ग्रन्थे चत्वारः प्रकाशाः वर्तन्ते। अत्र विशालायतनस्य नाट्यशास्त्रस्य प्रतिपाद्यविषयाः संक्षेपेण सरलतया च आलोचिताः भवन्ति। दशरूपकस्य कारिकाः मुख्यतः अनुष्टुपछन्दसि विरचिताः भवन्ति। परन्तु प्रत्येकप्रकाशस्यान्ते स्थानविशेषे आर्य-स्रग्धरा-इन्द्रवज्रा-वसन्ततिलक-उपजात्यादीनां वृत्तानां व्यवहारो दृश्यते। ग्रन्थस्य प्रारम्भे मंगलाचरणं कृत्वा धनञ्जयः ग्रन्थस्यास्य रचनायाः तात्पर्यमुपस्थापयति। ग्रन्थस्य निर्विघ्नसमाप्तिकामनया धनञ्जयेन श्लोकद्वयेन नमस्कारः क्रियते। धनञ्जयेन उक्तं यत् यं नाट्यवेदं ब्रह्मदेवः चतुर्वेदेभ्यः सारमादाय कृतवान् अस्य नाट्यवेदस्य सर्वाङ्गपूर्णं लक्षणं कोऽपि कर्तुं समर्थो न भवति। परन्तु धनञ्जयस्य दशरूपकग्रन्थे नाट्यवेदस्यास्य अङ्गभूतायाः रूपकविधायाः संक्षिप्ततया निरूपणं विधीयते। प्रयोजनमनुदिश्य मन्दोऽपि न प्रवर्तते - इति न्यायेन अपि ग्रन्थस्यास्य रचनायाः प्रयोजनं उल्लिख्यते -

**व्याकीर्णे मन्दबुद्धीनां जायते मतिविभ्रमः।**
**तस्यार्थस्तत्पदैस्तेन संक्षिप्य क्रियतेऽञ्जसा॥**[३]

अर्थात् मन्दबुद्धीनां विशालायतने नाट्यशास्त्रे मतिभ्रमो भवति। अतः स्वल्पबुद्धीनां कृते नाट्यशास्त्रस्यार्थः संक्षिप्ततया बोधनाय ग्रन्थोऽयं रचितो भवति। दशरूपकग्रन्थे आनन्दास्वादरूपप्रयोजनविषये धनञ्जयः कथयति-

**आनन्दनिस्यन्दिषु रूपकेषु व्युत्पत्तिमात्रं फलमल्पबुद्धिः।**
**योऽपातिहासादिवदाह साधुस्तस्मै नमः स्वादुपराङ्मुखाय॥**[४]

तदनु रूपकाणां दशभेदाः उल्लिखिताः -

**नाटकं सप्रकरणं भाणः प्रहसनं डिमः।**
**व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति॥**[५]

रूपकाणां भेदकत्वविषये धनञ्जयेन प्रोक्तम् -'**वस्तु नेता रसस्तेषां भेदकः**' अर्थात् कथावस्तुभेदेन नायकभेदेन तथा रसभेदेन रूपकाणि अन्येभ्यो भिन्नानि भवन्ति। अस्मादेतत् सूचितमस्ति यत् ग्रन्थेऽस्मिन् वस्तु-नायक-रसादिनाट्योपादानानि सविस्तरं धनञ्जयेन आलोच्यन्ते। प्रथमप्रकाशे कथावस्तुनः विभाजनं कृत्वा अर्थप्रकृतयः पञ्चावस्थाः पञ्चसन्धयः सन्ध्यङ्गानि पञ्च अर्थोपक्षेपकाः च विशदं प्रतिपादिताः।

रूपकस्य वस्तुभेदं प्रतिपाद्येदानीं द्वितीये प्रकाशे रूपकस्य अपरगुरुत्वपूर्णत्वं नायकस्य आलोचनमस्ति। अस्य प्रकाशस्य प्रारम्भे नायकस्य सामान्यलक्षणं निरूप्य नायकानां धीरोदात्तादयः चतुर्भेदाः समुपस्थापिताः। तदनन्तरं नायकस्य सात्विकगुणानां नायिकाभेदानां च सलक्षणमुल्लेखकृतोऽस्ति। नायिकानां ये खलु शरीरजायत्नजस्वभावजाः अलंकाराः वर्तन्ते तेषामपि आलोचनम् उपलभ्यते। अतः परं नायकस्य स्वभावरूपाः (व्यापारस्वरूपाः वा) कैशिकी, सात्वती, आरभटी, भारतीत्येताः नाट्यवृत्तयः निरूपिताः। अन्तिमे पात्राणां संस्कृतम्, शौरसेनी इत्यादीनां भाषाणां प्रयोगः पात्रानुरूपं सम्बोधनप्रकारः च निर्दिष्टः।

ग्रन्थस्य तृतीये प्रकाशे वस्तुनेतृरसानां नाटकप्रकरणादिषूपयोगः प्रतिपाद्यते। नाटकप्रकरणभाणादिषु दशरूपकेषु प्रथमतः नाटके वस्तुनेतृरसानामुपयोगः प्रतिपादयति। नाटकस्य विवेचनं किमर्थं प्रथमं कृतमस्ति इति जिज्ञासायामुच्यते -

**प्रकृतित्वादथान्येषां भूयोरसपरिग्रहात्।**
**संपूर्णलक्षणत्वाच्च पूर्वं नाटकमुच्यते॥**[६]

नाटकं खलु सर्वेषां रूपकाणां मूलमस्ति। नाट्यशास्त्रे 'दशरूपक' इति परिभाषा रूपकस्य दशप्रकारार्थे प्रयुक्तो भवति।[७] भरतस्य मतानुसारं त्रिभुवनस्य भावानुभूतेः अनुकरणमेव नाट्यम्।[८] नाटके रसस्य प्राचुर्यमस्ति। दशरूपकेषु नाटके एव सम्पूर्णं लक्षणं प्रतिफलितमस्ति। प्रकाशेऽस्मिन् रंगमञ्चे अप्रदर्शनीयविषयाणाम् अङ्केषु प्रदर्शितव्यवस्तुविषये, अङ्केषु पात्राणामुपस्थितिविषये, नाटके अङ्कानां संख्यादिविषये च आलोचनमुपलभ्यते। नाटकस्य लक्षणस्वरूपोपस्थापनादनन्तरं प्रकरणम्, भाणः, प्रहसनम्, डिमः, व्यायोगः, समवकारः, वीथि, अङ्कः, ईहामृग इत्यादीनां लक्षणं निरूपितम्। ग्रन्थस्यास्य चतुर्थप्रकाशे रससिद्धान्तस्य विशदमालोचनं प्राप्यते। प्रथमकारिकायां रसस्य स्वरूपं निरूप्य तदसाधनभूतस्य विभाव-अनुभाव-सात्विक-व्यभिचारिभावानां स्वरूपं प्रतिपादितम्। तदनु निर्वेदादित्रयत्रिंशव्यभिचारिभावानां स्वरूपं विस्तरेण निर्दिष्टम्। नाट्यशास्त्रवत् दशरूपके शान्तरसो नोपयुक्तरसं मन्यते तथा 'शम' इति स्थायिभावस्य सर्वथा नाटके निषेधः क्रियते - '**शममपि केचित् प्राहुः पुष्टिर्नाट्येषु नैतस्य**'।[९] अस्मिन्नेव प्रकाशे रसस्य आनन्दवर्धनसम्मतं व्यङ्ग्यत्वं निराकृतम्। अन्तिमांशे रसभेदानां स्वरूपं वर्णितम्।

नाट्यत्वानि -

नाट्यशास्त्रानुसारं दृश्यकाव्यस्य शरीरं भवति इतिवृत्तम् - '**इतिवृत्तं तु काव्यस्य शरीरं परिकीर्तितम्**'[१०] धनञ्जयस्य दशरूपकानुसारं नाट्यकथावस्तु मुख्यतः द्विधा भवति - आधिकारिकं प्रासङ्गिकं च। मुख्यं कथावस्तु आधिकारिकं गौणमङ्गरूपं कथावस्तु प्रासङ्गिकम्। नाटकस्य ईप्सितफलस्य स्वामित्वमधिकारः

फलस्वामी चाधिकारीत्युच्यते। अधिकारिणा ईप्सितफललाभपर्यन्तं प्रवाहितं इतिवृत्तमेव आधिकारिकम्। दशरूपके तदुक्तम् -

**अधिकारः फलस्वाम्यमधिकारी च तत्प्रभुः।**
**तन्निर्वर्त्यमभिव्यापि वृत्तं स्यादाधिकारिकम्॥**[११]

यदितिवृत्तं परार्थस्य अर्थात् मुख्यकथावस्तुनः प्रयोजनसिद्धर्थं काव्ये सन्निविष्टं भवति किन्तु प्रसङ्गतः स्वकीयमपि प्रयोजनं सिद्धं भवति तद् वृत्तान्तं प्रासंगिकमित्युच्यते। प्रासङ्गिक-कथावस्तु पुनरपि द्विधा विभज्यते - पताका प्रकरी च इति। आधिकारिकवृत्तान्तेन सह बहुदूरव्याप्तप्रासङ्गिकवृत्तान्तं पताका, निकटसम्बन्धयुक्तं प्रासङ्गिकवृत्तान्तमेव प्रकरी इत्युच्यते। यथा- रामायणे सुग्रीवकथा पताका, शबरीवृत्तान्तं प्रकरी भवति। पताकाप्रसङ्गेन पताकास्थानकं धनञ्जयः व्युत्पादयति -

**प्रस्तुतागन्तुभावस्य वस्तुनोऽन्योक्तिसूचकम्।**
**पताकास्थानकं तुल्यसंविधानविशेषणम्॥**[१२]

प्रस्तुतस्य भाविकथावस्तुनः अन्योक्तिमाध्यमेन सूचनमेव पताकास्थानकम्। भाविकथावस्तुनः सूचना समानवृत्तेन समानविशेषणेन च भवति। एवं दृश्यते यत् भाविवृत्तस्य सूचनार्थं निपुणः कविः पताकास्थानकं संयोजयति। पताकास्थानकमिदं तुल्येतिवृत्तितया तुल्यविशेषणतया च द्विप्रकारम् - अन्योक्तिसमासोक्तिभेदात्। धनञ्जयेन पताका-प्रकरी-आधिकारिक इति त्रिविधस्य वृत्तस्य त्रैविध्यमुल्लिखितम्-प्रख्यातमुत्पाद्यं मिश्रमिति।[१३] इतिहासादितः प्रख्यातकथातः गृहीतं कथावस्तु प्रख्यातम्। कविकल्पितं वस्तूत्पाद्यम्, यथा - मालतीमाधवम्। द्वयोः संमिश्रणमेव मिश्रवस्तु, यथा - सुभद्राधनञ्जयम्। पुनरपि सर्वं कथावस्तु दिव्यमदिव्यं दिव्यादिव्यभेदेन त्रिविधं भवति। दशरूपकानुसारं 'आदि' पदेन अत्र दिव्यादिव्यः ग्रहणीयः[१४]। विविधदिशा इतिवृत्तं विभज्य तस्य धमार्थकामरूपं फलं धनञ्जयेन निर्दिष्टम् - कार्यं त्रिवर्गस्तच्छुद्धमेकानेकानुबन्धि च।[१५] इतिवृत्तं कारणं भवति, धर्मार्थकामरूपं फलं अस्य कार्यमस्ति, अतः कारिकायां 'कार्यं त्रिवर्ग' इत्युच्यते। कथावस्तुनः फलोपायस्य सिद्धिहेतव अर्थप्रकृतयः भवन्ति। अर्थप्रकृतयः पञ्चसंख्यकाः भवन्ति। तद्यथा - बीज-बिन्दु-पताका-प्रकरी-कार्याणि। स्वरूपगतदिशा कथावस्तुनः विभाजनानन्तरं धनञ्जयः पुनः वस्तुविभागं निर्दिशति -

**द्वेधा विभागः कर्तव्यः सर्वस्यापीह वस्तुतः।**
**सूच्यमेव भवेत् किंचिद् दृश्यश्राव्यमथापरम्॥**[१६]

तदनुसारेण कथावस्तु द्विधा-सूच्यं दृश्यश्राव्यं च। कथावस्तुनः यस्य अंशस्य केवलं सूचना दीयते, तत् सूच्यम्। तदंशं निरसं अनुचितं वा भवति। नाट्यधर्मदिशा पुनर्वस्तु त्रिधा - सर्वश्राव्यं नियतश्राव्यम् अश्राव्यं च। यत्तु सर्वेषां श्राव्यं तद् सर्वश्राव्यम्, सर्वश्राव्यं प्रकाशमित्युच्यते। नियतजनस्य श्राव्यं तु नियतश्राव्यम्। नियतश्राव्यस्य भागद्वयमस्ति - जनान्तिकम् अपवारितं च। कस्यापि न श्राव्यं तु अश्राव्यम्, अश्राव्यं स्वगतमिति कथ्यते। नाट्यधर्मप्रसङ्गादाकाशभाषितस्य लक्षणमपि धनञ्जयेन प्रदत्तम् -

**किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत्।**
**श्रुत्वेवानुक्तमप्येकस्तत् स्यादाकाशभाषितम्॥**[१७]

दशरूपके नायकस्य साधारणलक्षणनिरूपणावसरे उक्तमस्ति यत् नायकः सर्वदा नम्र-मधुर-त्यागी-दक्ष-प्रियंवादी-लोकानुरञ्जक-प्रज्ञायुक्त-धार्मिकः चेति गुणसमन्विताः भवेयुः। नाटके प्रतिप्रादितस्य प्रधानफलस्य

कारको नायको भवति। नायकः नेता इति अभिधीयते। वस्तु-नेतृ-रसप्रभृतित्रिविधनाट्योपादानेषु नायकः नाटकस्य सर्वाधिकः महत्वपूर्ण अङ्गविशेषो भवति। अतः नाटकस्य वर्ण्यविषयः प्रारम्भतः समाप्तिपर्यन्तं सुचारुरूपेण नेतुं नायकः मुख्यभूमिकां गृह्णाति। एवं प्रकारेण वस्तु-रस-भावादिमुख्योपादनैः नाटकं सहृदयान् प्रति आकर्षणं कर्तुं नायकः प्रवृत्तो भवति। दशरूपकस्य द्वितीये प्रकाशे धनञ्जयः नायकस्य गुणानुसारं चतुर्भेदान् कृतवान् - धीरललित-धीरशान्त-धीरोदात्त-धीरोद्धताः। नाट्यदर्पणे स्वभावानुसारं धीरोद्धत-धीरोदात्त-धीरललित-धीरशान्तादिभेदेन नायकस्य चतुर्भेदाः स्वीकृताः।[१८]

लोकोत्तरवर्णननिपुणकविकर्मणः रसास्वादनं काव्यस्य मुख्यं प्रयोजनम्। भारतीयकाव्येषु रसस्य सर्वाधिकं महत्त्वं गीयते। भरतेन उक्तम् - 'न हि रसादृते कश्चिदर्थः प्रवर्तते'[१९]। परिणतप्रज्ञानां कवीनां प्रतिभा रसेन परिगणिता भवति। धनञ्जयमते विभावानुभावसात्विकव्यभिचारीभावेन परिपुष्टः स्थायीभाव एव रसः कथ्यते।[२०] रसस्य आलोचनावसरे धनञ्जयेन शृङ्गारस्य भेदत्रयं स्वीकृतम्-अयोगः, विप्रयोगः सम्भोगश्चेति[२१]। एतेषु विप्रयोगः विश्वनाथस्य विप्रलम्भ एव[२२]।

धनञ्जयस्य दशरूपके वस्तु-नेता-रसादिनाट्योपादानसम्बन्धे अन्यालंकारशास्त्राद्वैलक्षणं दृश्यते। नाट्यकथावस्तुनः विभाजनमपि दशरूपकवद् अन्यग्रन्थेषु न प्राप्यते। धनञ्जयस्य दशरूपके नाट्यकलायां गुरुत्वपूर्णानि सर्वोपादानानि सविस्तरमालोचितानि भवन्ति। दशप्रकाररूपकाणां सविस्तरविवेचनत्वात् विविधालंकारशास्त्राणामाधारग्रन्थरूपेण धनञ्जयस्य दशरूपकं गृहीतं वर्तते ।

**पादटीका :**

१. *दशरूपकम्*, (द.रू) ४.८६
२. तत्रैव, १.२
३. तत्रैव, १.५
४. तत्रैव, १.६
५. तत्रैव, १.८
६. तत्रैव, ३.१
७. *नाट्यशास्त्रम्*, (ना.शा.) १०.५९
८. त्रैलोकस्यास्य सर्वस्य नाट्यभावानुकीर्तनम्, तत्रैव, १.१०६
९. द.रू., ४.३५
१०. ना.शा., २१.१
११. द.रू., १.१२
१२. तत्रैव, १.१४
१३. प्रख्यातमितिहासादेरूत्पाद्यं कविकल्पितम्।
मिश्रं च सङ्करात्ताभ्यां दिव्यमर्त्यादिभेदतः ॥ - तत्रैव, १.१४-१६
१४. दिव्यमर्त्ये स तद्रूपो मिश्रमन्यतरस्तयोः, तत्रैव, ३.३
१५. तत्रैव, १.१६
१६. तत्रैव, १.५६

१७. तत्रैव, १.६७

१८. उद्धतोदात्त-ललित-शान्ता-धीर-विशेषणा: ।
वर्ण्या: स्वभावाश्चत्वार: नेतृणां मध्यमोत्तमा: ॥ - ना.द., पृ. २६

१९. ना.शा., पृ. २७१

२०. द.रू., ४.१

२१. तत्रैव, ४.५०

२२. *साहित्यदर्पण:*, ३.१८७

==00==